# Sanskrit Gaurava Ganam Sanskrit Song

# સંસ્કૃતગૌરવગાનમ્

## Document Information

Text title : saMskRitagauravagAnam

File name : saMskRitagAnam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Vasudevadvivedi Shastri

Proofread by : NA

Description/comments : See author's bAlakavitAvalI 2

Latest update : January 2, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 2, 2021

*sanskritdocuments.org*

Sanskrit Gaurava Ganam Sanskrit Song

# સંસ્કૃતગૌરવગાનમ્

ભારતીયૈકતા-સાધકં સંસ્કૃતં
ભારતીયત્વ-સમ્પાદકં સંસ્કૃતમ્ ।
જ્ઞાન-પુઞ્જ-પ્રભા-દર્શકં સંસ્કૃતં
સર્વદાનન્દ-સન્દોહ-દં સંસ્કૃતમ્ ॥ ૧॥

સર્વ-મસ્તિષ્ક-સંસ્કારકં સંસ્કૃતં
સર્વ-વાણી-પરિષ્કારકં સંસ્કૃતમ્ ।
સત્પથ-પ્રેરણા-દાયકં સંસ્કૃતં
સદ્ગુણ-ગ્રામ-સન્ધાયકં સંસ્કૃતમ્ ॥ ૨॥

વિશ્વવન્ધુત્વ-વિસ્તારકં સંસ્કૃતં
સર્વભૂતૈકતા-કારકં સંસ્કૃતમ્ ।
સર્વતઃ શાન્તિ-સંસ્થાપકં સંસ્કૃતં
પઞ્ચશીલ-પ્રતિષ્ઠાપકં સંસ્કૃતમ્ ॥ ૩॥

ત્યાગ-સન્તોષ-સેવા-વ્રતં સંસ્કૃતં
વિશ્વકલ્યાણ-નિષ્ઠાયુતં સંસ્કૃતમ્ ।
જ્ઞાન-વિજ્ઞાન-સમ્મેલનં સંસ્કૃતં
ભુક્તિ-મુક્તિ-દ્વયોદ્વેલનં સંસ્કૃતમ્ ॥ ૪॥

ધર્મકામાર્થ-મોક્ષ-પ્રદં સંસ્કૃતં
ઐહિકામુષ્મિકોત્કર્ષ-દં સંસ્કૃતમ્ ।
કર્મદં જ્ઞાનદં ભક્તિદં સંસ્કૃતં
સત્યનિષ્ઠં શિવં સુન્દરં સંસ્કૃતમ્ ॥ ૫॥

"સોઽહમસ્મીતિ"-નિશ્ચાયકં સંસ્કૃતં
"ત્વં તદેવેતિ" સઙ્ગાયકં સંસ્કૃતમ્ ।
"એકમેવાદ્વયં"-બોધકં સંસ્કૃતં
સર્વદા સત્યસંશોધકં સંસ્કૃતમ્ ॥ ૬॥

શબ્દ-લાલિત્ય-લીલાવનં સંસ્કૃતં
ચારુ-માધુર્ય-ધારાગૃહં સંસ્કૃતમ્ ।
વિશ્વ-ચેતશ્ચમત્કારકં સંસ્કૃતં
પૂર્વજાનાં યશઃસ્મારકં સંસ્કૃતમ્ ॥ ૭॥

નગરે નગરે ગ્રામે ગ્રામે વિલસતુ સંસ્કૃત-વાણી
સદને સદને જન-જન-વદને જયતુ ચિરં કલ્યાણી ।
સત્ય-શીલ-સૌન્દર્ય-સમીરા, જ્ઞાન-જલા, ગતિ-સારા,
છલ-છલ કલ-કલ પ્રવહતુ દિશિદિશિ
પાવન-સંસ્કૃત-ધારા ॥ ૮॥

- વાસુદેવદ્વિવેદી શાસ્ત્રી

*Sanskrit Gaurava Ganam Sanskrit Song*

pdf was typeset on January 2, 2021

Please send corrections to *sanskrit@cheerful.com*